# श्री सायिनाथ अष्टकं

### श्री सायिनाथ अष्टकं

पत्रिग्राम समुद्भूतं द्वारकामायि वासिनं |
भक्ताभीष्टप्रदं देवं सायिनाथं नमाम्यहं || 1 ||

महोन्नत कुलेजातं क्षीरांबुधि समे शुभे |
द्विजराजं तमोघ्नं तं सायिनाथं नमाम्यहं || 2 ||

जगदुद्धारणार्थं यो नररूप धरो विभुः |
योगिनं च महात्मानं सायिनाथं नमाम्यहं || 3 ||

साक्षात्कारे जये लाभे स्वात्मारामो गुरोर्मुखात् |
निर्मलं मम गात्रं च सायिनाथं नमाम्यहं || 4 ||

यस्य दर्शन मात्रेण नश्यंति व्याधि कोटयः |
सर्वे पापाः प्रणश्यंति सायिनाथं नमाम्यहं || 5 ||

नरसिंहादि शिष्याणां ददौ योऽनुग्रहं गुरुः |
भवबंधापहर्तारं सायिनाथं नमाम्यहं || 6 ||

धनाढ्यान् च दरिद्रान्यः समदृष्ट्येव पश्यति |
करुणासागरं देवं सायिनाथं नमाम्यहं || 7 ||

समाधिस्थोपि यो भक्त्या समतीर्थार्थदानतः |
अचिंत्य महिमानंतं सायिनाथं नमाम्यहं || 8 ||

इति श्री सायिनाथ अष्टकं ||